# काव्यद्वारा संस्कृतम्

SPF
प्रकाशनविभागः

**(वाल्मीकिव्यासादिभिः महर्षिभिः लौकिकसंस्कृतसाहित्यस्य या काव्यधारा प्रवाहिता तस्यां धारायां निमग्नाः अनेके कवयः, महर्षयः आचार्याः च स्व-स्व-कृतीनां माध्यमेन अस्मिन् जगति प्रसिद्धिं प्राप्तवन्तः ।)**

**(महाभारतस्य भाषा - संस्कृतम् आस्वाद्यताम्)**

**महाभारतम्** आर्यसंस्कृतेः भारतीयसनातनधर्मस्य च अन्यतमः ग्रन्थः अस्ति । अयं ग्रन्थः जीवनमूल्यानाम् अमूल्यः न्यासः अनुपमः च ज्ञाननिधिः वर्तते । महाभारतं केवलं महाकाव्यम् एव न, अपि तु आर्यावर्तस्य इतिहासस्य, धर्मग्रन्थस्य, राजनीतेः कर्मयोगस्य च दर्शनम् अस्ति । इदं गूढार्थमयं ज्ञानविज्ञानशास्त्रम्, भक्तिशास्त्रम्, अध्यात्मशास्त्रम्, सर्वशास्त्राणां सङ्ग्रहणं च वर्तते ।

**धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।**
**यदिहास्ति तदन्यत्र, यन्नेहास्ति न तत् क्वचित् ॥**

सरलसंस्कृतेन विरचितम् इदम् पुस्तकं **'काव्यद्वारा संस्कृतम्'** इति उद्देश्यं प्राप्तुं लोकोपकारि भविष्यति इति आशया **'महाभारतस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इति कश्चन पाठ्यक्रमः ***संस्कृत-संवर्धन-प्रतिष्ठानेन*** निर्मितः अस्ति । ***'महाभारतस्य भाषा'*** इत्यनेन ***'महाभारतग्रन्थे प्रयुक्तायाः संस्कृतभाषायाः शैली'*** इति अभिप्रायः अस्ति । एतस्य द्वौ पाठ्यक्रमौ स्तः ।

एतयोः पाठ्यक्रमयोः **प्रतिश्लोकं पदच्छेदः, पदपरिचयः, अर्थावबोधनम्, अन्वयः, पदार्थः, भावार्थः, व्याकरणांशाः** च प्रदत्ताः सन्ति ।

- **'महाभारतस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इत्यस्य पुस्तकस्य भागद्वयम् अस्ति । अनयोः द्वयोः भागयोः आहत्य चत्वारः खण्डाः सन्ति । प्रथमे भागे प्रथमः द्वितीयः च खण्डः सङ्गृहीतः अस्ति ।
- **प्रथमे खण्डे नीति-उपदेशः द्वितीये खण्डे च यक्षयुधिष्ठिरसंवादः अस्ति ।**
- **तृतीये खण्डे नारदोपदेशः चतुर्थे खण्डे च राजधर्मोपदेशः अस्ति ।**

**(रामायणस्य भाषा - संस्कृतम् आस्वाद्यताम्)**

**रामकथा** न केवलं भारतवर्षे अपि तु अनेकेषु द्वीपेषु बहुषु च देशेषु मनुष्याणां हृदयानि आकर्षयति। सम्पूर्णे लौकिकवाङ्मये एतादृशः अन्यः कश्चित् ग्रन्थः न दृश्यते, यस्य प्रभावः जनानां चरित्रे चिन्तने च एतावान् गम्भीरः अनुभूयते । महर्षिणा वाल्मीकिना रामायणे वर्णिता रामकथा अधुना अपि सहृदयैः, धर्मार्थ-काममोक्षार्थिभिः, इतिहास-अन्वेषकैः, समाजशास्त्र-जिज्ञासुभिः, अनुरागपूर्वकं श्रद्धापूर्वकं सकौतुकं च परिशील्यते । अत एव अस्याः कथायाः महत्त्वं शाश्वतम् एव मन्यते । **उक्तञ्च** –

**यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।**
**तावद् रामायणकथा लोकेषु प्रचरिष्यति ॥**

सरलसंस्कृतेन विरचितम् इदम् पुस्तकं **'काव्यद्वारा संस्कृतम्'** इति उद्देश्यं प्राप्तुं लोकोपकारि भविष्यति इति आशया **'रामायणस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इति कश्चन पाठ्यक्रमः ***संस्कृत-संवर्धन-प्रतिष्ठानेन*** निर्मितः अस्ति । ***'रामायणस्य भाषा'*** इत्यनेन ***'रामायणग्रन्थे प्रयुक्तायाः संस्कृतभाषायाः शैली'*** इति अभिप्रायः अस्ति ।

अस्मिन् पाठ्यक्रमे **प्रतिश्लोकं पदच्छेदः, पदपरिचयः, अर्थावबोधनम्, अन्वयः, पदार्थः, भावार्थः व्याकरणांशाः च प्रदत्ताः** सन्ति ।

- **रामायणस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इत्यस्य पुस्तकस्य **एकः भागः** अस्ति । अस्मिन् भागे विशेषतया अयोध्याकाण्डात् चितानां शतश्लोकानां व्याख्यानम् अस्ति ।

**(रघुवंशस्य भाषा - संस्कृतम् आस्वाद्यताम्)**

**महाकविना कालिदासेन** विरचितेषु काव्येषु अन्यतमं **'रघुवंशमहाकाव्यम्'** अस्ति । तत्र न केवलं रघुवंशस्थानां राज्ञां वर्णनमात्रमस्ति, अपितु कालिदासस्य भाषासौष्ठवम्, रचनाचातुर्यम्, कल्पनायाः निदर्शनम्, शृङ्गारादिरसानां माधुर्यादिगुणानां च परिपाकः उपमालङ्कारस्य चमत्कृतिः च सर्वत्र पुनः पुनः दृश्यते । **उक्तञ्च** –

**पुरा कवीनां गणनाप्रसङ्गे कनिष्ठिकाऽधिष्ठितकालिदासा ।**

**अद्याऽपि तत्तुल्यकवेरभावादनामिका साऽर्थवती बभूव ।।**

सरलसंस्कृतेन विरचितम् इदम् पुस्तकं **'काव्यद्वारा संस्कृतम्'** इति उद्देश्यं प्राप्तुं लोकोपकारि भविष्यति इति आशया **'रघुवंशस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इति कश्चन पाठ्यक्रमः ***संस्कृत-संवर्धन-प्रतिष्ठानेन*** निर्मितः अस्ति। ***'रघुवंशस्य भाषा'*** इत्यनेन ***'रघुवंशग्रन्थे प्रयुक्तायाः संस्कृतभाषायाः शैली'*** इति अभिप्रायः अस्ति।

अस्मिन् पाठ्यक्रमे **प्रतिश्लोकं पदच्छेदः, पदपरिचयः, अर्थावबोधनम्, अन्वयः, पदार्थः, भावार्थः व्याकरणांशाः** च प्रदत्ताः सन्ति।

- **रघुवंशस्य भाषा - संस्कृतम् आस्वाद्यताम्'** इत्यस्य पुस्तकस्य एकः भागः अस्ति। अस्मिन् भागे प्रथमसर्गात् चितानां षट्सप्ततिश्लोकानां व्याख्यानम् अस्ति।

**(सुभाषितानां भाषा - संस्कृतम् आस्वाद्यताम्)**

**भाषासु मुख्या मधुरा दिव्या गीर्वाणभारती।**
**तस्यां हि काव्यं मधुरं तस्मादपि सुभाषितम् ।।**

सुभाषितेषु मानवजीवनस्य व्यावहारिकं ज्ञानं भवति। सुभाषितानि तु जीवनस्य पथप्रदर्शकानि भवन्ति। येन जीवनं सुखकरं समुन्नतं च भवति। सुभाषितेषु सूचनात्मकं कथनं प्रायः न भवति अपि तु प्रत्यक्षतः ये स्वकीये जीवने सुखं दुःखं च अनुभूतवन्तः तेषां महापुरुषाणां जीवनस्य अनुभवानां सारः भवति। अत एव बहवः जनाः **चाणक्यनीतिः, विदुरनीतिः, शुक्रनीतिः, भर्तृहरिशतकम्, रामायणं महाभारतं** च इत्यादीनां ग्रन्थानां नैरन्तर्येण अध्ययनेन जीवनस्य समस्यानां नैराश्यस्य च नाशनाय निरन्तरं प्रयतमानाः भवन्ति।

सरलसंस्कृतेन विरचितम् इदं पुस्तकं **'काव्यद्वारा संस्कृतम्'** इति उद्देश्यं प्राप्तुं लोकोपकारि भविष्यति इति आशया **'सुभाषितानां भाषा - संस्कृतम् आस्वाद्यताम्'** इति कश्चन पाठ्यक्रमः ***संस्कृत-संवर्धन-प्रतिष्ठानेन*** निर्मितः अस्ति। ***'सुभाषितानां भाषा - संस्कृतम् आस्वाद्यताम्'*** इत्यनेन ***'सुभाषितग्रन्थे प्रयुक्तायाः संस्कृतभाषायाः शैली'*** इति अभिप्रायः अस्ति।

अस्मिन् पाठ्यक्रमे **प्रतिश्लोकं पदच्छेदः, पदपरिचयः, अर्थावबोधनम्, अन्वयः, पदार्थः, भावार्थः, व्याकरणांशाः** च प्रदत्ताः सन्ति।

- **सुभाषितानां भाषा : संस्कृतम् आस्वाद्यताम्'** इत्यस्य पुस्तकस्य एकः भागः अस्ति। अस्मिन् भागे विशेषतया **'सुभाषितरत्नभाण्डागार इति पुस्तकात्'** चितानां शतश्लोकानां व्याख्यानम् अस्ति।

इत्थं काव्यग्रन्थेषु प्रयुक्तायाः भाषायाः आधारेण संस्कृतभाषाज्ञानवर्धनाय कौशलविकासाय च अत्रत्याः पाठाः सज्जीकृताः सन्ति । एतेषु पाठ्यक्रमेषु नामाङ्कनं कर्तुं भवन्तः अस्मिन् website मध्ये गच्छन्तु www.learnsamskrit.online। शुभं भवतु।